श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ षड्सप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षट्सप्ततितमः सर्गः ॥

## अङ्गदेन कम्पनप्रजङ्घयोर्द्विविदेन शोणिताक्षस्य मैन्देन यूपाक्षस्य सुग्रीवेण कुम्भस्य वधश्च

प्रवृत्ते सङ्कुले तस्मिन् घोरे वीरजनक्षये।
अङ्गदः कम्पनं वीरमाससाद रणोत्सुकः ॥ **6.76.1** ॥

आहूय सोऽङ्गदं कोपात् ताडयामास वेगितः।
गदया कम्पनः पूर्वं स चचाल भृशाहतः ॥ **6.76.2** ॥

स संज्ञां प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः।
अर्दितश्च प्रहारेण कम्पनः पतितो भुवि ॥ **6.76.3** ॥

ततस्तु कम्पनं दृष्ट्वा शोणिताक्षो हतं रणे।
रथेनाभ्यपतत् क्षिप्रं तत्राङ्गदमभीतवत् ॥ **6.76.4** ॥

सोऽङ्गदं निशितैर्बाणैस्तदा विव्याध वेगितः।
शरीरदारणैस्तीक्ष्णैः कालाग्निसमविग्रहैः ॥ **6.76.5** ॥

क्षुरक्षुरप्रनाराचैर्वत्सदन्तैः शिलीमुखैः।
कर्णिशल्यविपाठैश्च बहुभिर्निशितैः शरैः ॥ **6.76.6** ॥

अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रः प्रतापवान्।
धनुरुग्रं रथं बाणान् ममर्द तरसा बली ॥ **6.76.7** ॥

शोणिताक्षस्ततः क्षिप्रमसिचर्म समाददे।
उत्पपात तदा क्रुद्धो वेगवानविचारयन्॥ **6.76.8** ॥

तं क्षिप्रतरमाप्लुत्य परामृश्याङ्गदो बली।
करेण तस्य तं खड्गं समाच्छिद्य ननाद च॥ **6.76.9** ॥

तस्यांसफलके खड्गं निजघान ततोऽङ्गदः।
यज्ञोपवीतवच्चैनं चिच्छेद कपिकुञ्जरः॥ **6.76.10** ॥

तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः।
वालिपुत्रोऽभिदुद्राव रणशीर्षे परानरीन्॥ **6.76.11** ॥

प्रजङ्घसहितो वीरो यूपाक्षस्तु ततो बली।
रथेनाभिययौ क्रुद्धो वालिपुत्रं महाबलम्॥ **6.76.12** ॥

आयसीं तु गदां गृह्य स वीरः कनकाङ्गदः।
शोणिताक्षः समाश्वस्य तमेवानुपपात ह॥ **6.76.13** ॥

प्रजङ्घस्तु महावीरो यूपाक्षसहितो बली।
गदयाभिययौ क्रुद्धो वालिपुत्रं महाबलम्॥ **6.76.14** ॥

तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजङ्घयोः।
विशाखयोर्मध्यगतः पूर्णचन्द्र इवाबभौ॥ **6.76.15** ॥

अङ्गदं परिरक्षन्तौ मैन्दो द्विविद एव च।
तस्य तस्थतुरभ्याशे परस्परदिदृक्षया॥ **6.76.16** ॥

अभिपेतुर्महाकायाः प्रतियत्ता महाबलाः।
राक्षसा वानरान् रोषादसिबाणगदाधराः॥ **6.76.17** ॥

त्रयाणां वानरेन्द्राणां त्रिभी राक्षसपुङ्गवैः।
संसक्तानां महद् युद्धमभवद् रोमहर्षणम्॥ **6.76.18** ॥

ते तु वृक्षान् समादाय सम्प्रचिक्षिपुराहवे।
खड्गेन प्रतिचिक्षेप तान् प्रजङ्घो महाबलः॥ **6.76.19** ॥

रथानश्वान् द्रुमाञ्छैलान् प्रतिचिक्षिपुराहवे।
शरौघैः प्रतिचिच्छेद तान् यूपाक्षो महाबलः॥ **6.76.20** ॥

सृष्टान् द्विविदमैन्दाभ्यां द्रुमानुत्पाट्य वीर्यवान्।
बभञ्ज गदया मध्ये शोणिताक्षः प्रतापवान्॥ **6.76.21** ॥

उद्यम्य विपुलं खड्गं परमर्मविदारणम्।
प्रजङ्घो वालिपुत्राय अभिदुद्राव वेगितः॥ **6.76.22** ॥

तमभ्याशगतं दृष्ट्वा वानरेन्द्रो महाबलः।
आजघानाश्वकर्णेन द्रुमेणातिबलस्तदा॥ **6.76.23** ॥

बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना।
वालिपुत्रस्य घातेन स पपात क्षितावसिः॥ **6.76.24** ॥

तं दृष्ट्वा पतितं भूमौ खड्गं मुसलसन्निभम्।
मुष्टिं संवर्तयामास वज्रकल्पं महाबलः॥ **6.76.25** ॥

स ललाटे महावीर्यमङ्गदं वानरर्षभम्।
आजघान महातेजाः स मुहूर्तं चचाल ह॥ **6.76.26** ॥

स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रतापवान्।
प्रजङ्घस्य शिरः कायात् पातयामास मुष्टिना॥ **6.76.27** ॥

स यूपाक्षोऽश्रुपूर्णाक्षः पितृव्ये निहते रणे।
अवरुह्य रथात् क्षिप्रं क्षीणेषुः खड्गमाददे॥ **6.76.28** ॥

तमापतन्तं सम्प्रेक्ष्य यूपाक्षं द्विविदस्त्वरन्।
आजघानोरसि क्रुद्धो जग्राह च बलाद् बली॥ **6.76.29** ॥

गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षो महाबलः।
आजघान महातेजा वक्षसि द्विविदं ततः॥ **6.76.30** ॥

स ततोऽभिहतस्तेन चचाल च महाबलः।
उद्यतां च पुनस्तस्य जहार द्विविदो गदाम्॥ **6.76.31** ॥

एतस्मिन्नन्तरे मैन्दो द्विविदाभ्याशमागमत्।
यूपाक्षं ताडयामास तलेनोरसि वीर्यवान्॥ **6.76.32** ॥

तौ शोणिताक्षयूपाक्षौ प्लवङ्गाभ्यां तरस्विनौ।
चक्रतुः समरे तीव्रमाकर्षोत्पाटनं भृशम्॥ **6.76.33** ॥

द्विविदः शोणिताक्षं तु विददार नखैर्मुखे।
निष्पिपेष स वीर्येण क्षितावाविध्य वीर्यवान्॥ **6.76.34** ॥

यूपाक्षमभिसङ्क्रुद्धो मैन्दो वानरपुङ्गवः।
पीडयामास बाहुभ्यां पपात स हतः क्षितौ॥ **6.76.35** ॥

हतप्रवीरा व्यथिता राक्षसेन्द्रचमूस्तथा।
जगामाभिमुखी सा तु कुम्भकर्णात्मजो यतः॥ **6.76.36** ॥

आपतन्तीं च वेगेन कुम्भस्तां सान्त्वयच्चमूम्।
अथोत्कृष्टं महावीर्यैर्लब्धलक्षैः प्लवङ्गमैः॥ **6.76.37** ॥

निपातितमहावीरां दृष्ट्वा रक्षश्चमूं तदा।
कुम्भः प्रचक्रे तेजस्वी रणे कर्म सुदुष्करम्॥ **6.76.38** ॥

स धनुर्धन्विनां श्रेष्ठः प्रगृह्य सुसमाहितः।
मुमोचाशीविषप्रख्याञ्छरान् देहविदारणान्॥ **6.76.39** ॥

तस्य तच्छुशुभे भूयः सशरं धनुरुत्तमम्।
विद्युदैरावतार्चिष्मद्द्वितीयेन्द्रधनुर्यथा॥ **6.76.40** ॥

आकर्णकृष्टमुक्तेन जघान द्विविदं तदा।
तेन हाटकपुङ्खेन पत्रिणा पत्रवाससा॥ **6.76.41** ॥

सहसाभिहतस्तेन विप्रमुक्तपदः स्फुरन्।
निपपात त्रिकूटाभो विह्वलन् प्लवगोत्तमः॥ **6.76.42** ॥

मैन्दस्तु भ्रातरं तत्र भग्नं दृष्ट्वा महाहवे।
अभिदुद्राव वेगेन प्रगृह्य विपुलां शिलाम्॥ **6.76.43** ॥

तां शिलां तु प्रचिक्षेप राक्षसाय महाबलः।
बिभेद तां शिलां कुम्भः प्रसन्नैः पञ्चभिः शरैः॥ **6.76.44** ॥

सन्धाय चान्यं सुमुखं शरमाशीविषोपमम्।
आजघान महातेजा वक्षसि द्विविदाग्रजम्॥ **6.76.45** ॥

स तु तेन प्रहारेण मैन्दो वानरयूथपः।
मर्मण्यभिहतस्तेन पपात भुवि मूर्च्छितः॥ **6.76.46** ॥

अङ्गदो मातुलौ दृष्ट्वा मथितौ तु महाबलौ।
अभिदुद्राव वेगेन कुम्भमुद्यतकार्मुकम्॥ **6.76.47** ॥

तमापतन्तं विव्याध कुम्भः पञ्चभिरायसैः।
त्रिभिश्चान्यैः शितैर्बाणैर्मातङ्गमिव तोमरैः।
सोऽङ्गदं बहुभिर्बाणैः कुम्भो विव्याध वीर्यवान्॥ **6.76.48** ॥

अकुण्ठधारैर्निशितैस्तीक्ष्णैः कनकभूषणैः।
अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रो न कम्पते॥ **6.76.49** ॥

शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह।
स प्रचिच्छेद तान् सर्वान् बिभेद च पुनः शिलाः॥ **6.76.50** ॥

कुम्भकर्णात्मजः श्रीमान् वालिपुत्रसमीरितान्।
आपतन्तं च सम्प्रेक्ष्य कुम्भो वानरयूथपम्॥ **6.76.51** ॥

भ्रुवौ विव्याध बाणाभ्यामुल्काभ्यामिव कुञ्जरम्।
तस्य सुस्राव रुधिरं पिहिते चास्य लोचने॥ **6.76.52** ॥

अङ्गदः पाणिना नेत्रे पिधाय रुधिरोक्षिते।
सालमासन्नमेकेन परिजग्राह पाणिना॥ **6.76.53** ॥

सम्पीड्योरसि सस्कन्धं करेणाभिनिवेश्य च।
किञ्चिदभ्यवनम्यैनमुन्ममाथ महारणे॥ **6.76.54** ॥

तमिन्द्रकेतुप्रतिमं वृक्षं मन्दरसन्निभम्।
समुत्सृजत वेगेन मिषतां सर्वरक्षसाम्॥ **6.76.55** ॥

स चिच्छेद शितैर्बाणैः सप्तभिः कायभेदनैः।
अङ्गदो विव्यथेऽभीक्ष्णं स पपात मुमोह च॥ **6.76.56** ॥

अङ्गदं पतितं दृष्ट्वा सीदन्तमिव सागरे।
दुरासदं हरिश्रेष्ठा राघवाय न्यवेदयन्॥ **6.76.57** ॥

रामस्तु व्यथितं श्रुत्वा वालिपुत्रं महाहवे।
व्यादिदेश हरिश्रेष्ठाञ्जाम्बवत्प्रमुखांस्ततः॥ **6.76.58** ॥

ते तु वानरशार्दूलाः श्रुत्वा रामस्य शासनम्।
अभिपेतुः सुसङ्क्रुद्धाः कुम्भमुद्यतकार्मुकम्॥ **6.76.59** ॥

ततो द्रुमशिलाहस्ताः कोपसंरक्तलोचनाः।
रिरक्षिषन्तोऽभ्यपतन्नङ्गदं वानरर्षभाः॥ **6.76.60** ॥

जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः।
कुम्भकर्णात्मजं वीरं क्रुद्धाः समभिदुद्रुवुः॥ **6.76.61** ॥

समीक्ष्यापततस्तांस्तु वानरेन्द्रान् महाबलान्।
आववार शरौघेण नगेनेव जलाशयम्॥ **6.76.62** ॥

तस्य बाणपथं प्राप्य न शेकुरपि वीक्षितुम्।
वानरेन्द्रा महात्मानो वेलामिव महोदधिः॥ **6.76.63** ॥

तांस्तु दृष्ट्वा हरिगणाञ्शरवृष्टिभिरर्दितान्।
अङ्गदं पृष्ठतः कृत्वा भ्रातृजं प्लवगेश्वरः॥ **6.76.64** ॥

अभिदुद्राव सुग्रीवः कुम्भकर्णात्मजं रणे।
शैलसानुचरं नागं वेगवानिव केसरी॥ **6.76.65** ॥

उत्पाट्य च महावृक्षानश्वकर्णादिकान् बहून्।
अन्यांश्च विविधान् वृक्षांश्चिक्षेप स महाकपिः॥ **6.76.66** ॥

तां छादयन्तीमाकाशं वृक्षवृष्टिं दुरासदाम्।
कुम्भकर्णात्मजः श्रीमांश्चिच्छेद स्वशरैः शितैः॥ **6.76.67** ॥

अभिलक्ष्येण तीव्रेण कुम्भेन निशितैः शरैः।
आचितास्ते द्रुमा रेजुर्यथा घोराः शतघ्नयः।
द्रुमवर्षं तु तद् भिन्नं दृष्ट्वा कुम्भेन वीर्यवान्॥ **6.76.68** ॥

वानराधिपतिः श्रीमान् महासत्त्वो न विव्यथे।
स विध्यमानः सहसा सहमानस्तु ताञ्छरान्॥ **6.76.69** ॥

कुम्भस्य धनुराक्षिप्य बभञ्जेन्द्रधनुःप्रभम्।
अवप्लुत्य ततः शीघ्रं कृत्वा कर्म सुदुष्करम्॥ **6.76.70** ॥

अब्रवीत् कुपितः कुम्भं भग्नशृङ्गमिव द्विपम्।
निकुम्भाग्रज वीर्यं ते बाणवेगं तदद्भुतम्॥ **6.76.71** ॥

सन्नतिश्च प्रभावश्च तव वा रावणस्य वा।
प्रह्लादबलिवृत्रघ्नकुबेरवरुणोपम॥ **6.76.72** ॥

एकस्त्वमनुजातोऽसि पितरं बलवत्तरम्।
त्वामेवैकं महाबाहुं शूलहस्तमरिन्दमम्॥ **6.76.73** ॥

त्रिदशा नातिवर्तन्ते जितेन्द्रियमिवाधयः।
विक्रमस्व महाबुद्धे कर्माणि मम पश्य च॥ **6.76.74** ॥

वरदानात् पितृव्यस्ते सहते देवदानवान्।
कुम्भकर्णस्तु वीर्येण सहते च सुरासुरान्॥ **6.76.75** ॥

धनुषीन्द्रजितस्तुल्यः प्रतापे रावणस्य च।
त्वमद्य रक्षसां लोके श्रेष्ठोऽसि बलवीर्यतः॥ **6.76.76** ॥

महाविमर्दं समरे मया सह तवाद्भुतम्।
अद्य भूतानि पश्यन्तु शक्रशम्बरयोरिव॥ **6.76.77** ॥

कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलम्।
पतिता हरिवीराश्च त्वयैते भीमविक्रमाः॥ **6.76.78** ॥

उपालम्भभयाच्चैव नासि वीर मया हतः।
कृतकर्मपरिश्रान्तो विश्रान्तः पश्य मे बलम्॥ **6.76.79** ॥

तेन सुग्रीववाक्येन सावमानेन मानितः।
अग्नेराज्यहुतस्येव तेजस्तस्याभ्यवर्धत॥ **6.76.80** ॥

ततः कुम्भस्तु सुग्रीवं बाहुभ्यां जगृहे तदा।
गजाविवातीतमदौ निःश्वसन्तौ मुहुर्मुहुः॥ **6.76.81** ॥

अन्योन्यगात्रग्रथितौ घर्षन्ताावितरेतरम्।
सधूमां मुखतो ज्वालां विसृजन्तौ परिश्रमात्॥ **6.76.82**॥

तयोः पादाभिघाताच्च निमग्ना चाभवन्मही।
व्याघूर्णिततरङ्गश्च चुक्षुभे वरुणालयः॥ **6.76.83**॥

ततः कुम्भं समुत्क्षिप्य सुग्रीवो लवणाम्भसि।
पातयामास वेगेन दर्शयन्नुदधेस्तलम्॥ **6.76.84**॥

ततः कुम्भनिपातेन जलराशिः समुत्थितः।
विन्ध्यमन्दरसङ्काशो विससर्प समन्ततः॥ **6.76.85**॥

ततः कुम्भः समुत्पत्य सुग्रीवमभिपात्य च।
आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना॥ **6.76.86**॥

तस्य वर्म च पुस्फोट सञ्जज्ञे चापि शोणितम्।
तस्य मुष्टिर्महावेगः प्रतिजघ्नेऽस्थिमण्डले॥ **6.76.87**॥

तस्य वेगेन तत्रासीत् तेजः प्रज्वलितं महत्।
वज्रनिष्पेषसञ्जाता ज्वाला मेरोर्यथा गिरेः॥ **6.76.88**॥

स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः।
मुष्टिं संवर्तयामास वज्रकल्पं महाबलः॥ **6.76.89**॥

अर्चिःसहस्रविकचरविमण्डलवर्चसम्।
स मुष्टिं पातयामास कुम्भस्योरसि वीर्यवान्॥ **6.76.90**॥

स तु तेन प्रहारेण विह्वलो भृशपीडितः।
निपपात तदा कुम्भो गतार्चिरिव पावकः॥ **6.76.91**॥

मुष्टिनाभिहतस्तेन निपपाताशु राक्षसः।
लोहिताङ्ग इवाकाशाद् दीप्तरश्मिर्यदृच्छया॥ **6.76.92**॥

कुम्भस्य पततो रूपं भग्नस्योरसि मुष्टिना।
बभौ रुद्राभिपन्नस्य यथा रूपं गवां पतेः॥ **6.76.93**॥

तस्मिन् हते भीमपराक्रमेण
    प्लवङ्गमानामृषभेण युद्धे।
मही सशैला सवना चचाल
    भयं च रक्षांस्यधिकं विवेश॥ **6.76.94**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्सप्ततितमः सर्गः॥